# Shrimad Anadi Siddalinga Stavanam

# શ્રીમદનાદિસિદ્ધલિઙ્ગસ્તવનમ્

## Document Information

Text title : Shrimad Anadi Siddalinga Stavanam

File name : anAdisiddhalingastavanam.itx

Category : shiva, aShTaka

Location : doc_shiva

Author : ShaDakSharadeva

Proofread by : Vani V.

Latest update : October 31, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 31, 2022

*sanskritdocuments.org*

# શ્રીમદનાદિસિદ્ધલિઙ્ગસ્તવનમ્

(ઉભયકવિતાવિશારદ ષડક્ષરદેવવિરચિતમ્)

જગજ્જાલપાલં જનસ્તુત્યશીલમ્
    ભવારણ્યદાવં ભૃત સ્વાનુભાવમ્ ।
શિવાનન્દકોશં દિનેશપ્રકાશમ્
    મહાલિઙ્ગસઙ્ગં ભજે સિદ્ધલિઙ્ગમ્ ॥ ૧॥

સ્વતન્ત્ર સ્વલીલં ગણેન્દ્રાનુકૂલમ્
    મિલન્મૂલમન્ત્રં પ્રણીતેશ તન્ત્રમ્ ।
શિવધ્યાનસક્તં પરાનાદિમુક્તમ્
    મહાલિઙ્ગસઙ્ગં ભજે સિદ્ધલિઙ્ગમ્ ॥ ૨॥

પરિવ્રાડ્વરેણ્યં ગણેશાગ્રગણ્યમ્
    સદાસત્યભાષં શિવજ્ઞાનભૂષમ્ ।
સરુદ્રાક્ષમાલં લસદ્ભસ્મફાલમ્
    મહાલિઙ્ગસઙ્ગં ભજે સિદ્ધલિઙ્ગમ્ ॥ ૩॥

શિવાચારપક્ષં કૃપાભૃત્કટાક્ષમ્
    ષડધ્વાદિબીજં નતામર્ત્યભૂજમ્ ।
પરિત્યક્તરાગં પરબ્રહ્મયોગમ્
    મહાલિઙ્ગસઙ્ગં ભજે સિદ્ધલિઙ્ગમ્ ॥ ૪॥

કલાસત્કલાપં કપર્દિસ્વરૂપમ્
    મનોવૃત્તિશૂન્યં મુનિવ્રાતમાન્યમ્ ।
સમગ્ચદ્ગુણાઙ્કં સદા નિષ્કલઙ્કમ્
    મહાલિઙ્ગસઙ્ગં ભજે સિદ્ધલિઙ્ગમ્ ॥ ૫॥

પવિત્રાભિધેયં પરામ્નાયગેયં
    નિરસ્તાઙ્ગજાતં સુધાસ્ફીતગીતમ્ ।
પરિચ્છિન્નપાશં સમસ્તામરેશમ્

મહાલિઙ્ગસઙ્ગં ભજે સિદ્ધલિઙ્ગમ્ ॥ ૬॥

પવિત્રસ્વગાત્રં બુધસ્તોત્ર પાત્રમ્
નિકૃત્તાવરોધં નિસર્ગાવબોધમ્ ।
ચિદામોદભાજં ચરાચાર્યરાજમ્
મહાલિઙ્ગસઙ્ગં ભજે સિદ્ધલિઙ્ગમ્ ॥ ૭॥

જિતારાતિવર્ગં ગૃહીતાદ્યમાર્ગમ્
તતામ્નાયસારં તમસ્તોમદૂરમ્ ।
પરાષટ્સ્થાલાઙ્કું નિરાતઙ્કુશઙ્કુમ્
મહાલિઙ્ગસઙ્ગં ભજે સિદ્ધલિઙ્ગમ્ ॥ ૮॥

ભુજઙ્ગપ્રયાતં સ્તવં સિદ્ધલિઙ્ગ
પ્રભોર્મૂલમન્ત્રાભિધાનેન ક્લુપ્તમ્ ।
ભુજઙ્ગાશ્રમસ્થસ્ય યોવા પઠે-
ત્સોઽપ્યવાપ્નોત્યભીષ્ટં ચ ભોગં ચ મોક્ષમ્ ॥

ઇતિ ઉભયકવિતાવિશારદ ષડક્ષરદેવવિરચિતં શ્રીમદનાદિ સિદ્ધલિઙ્ગસ્તવનમ્ ।

Proofread by Vani V.

*Shrimad Anadi Siddalinga Stavanam*
pdf was typeset on October 31, 2022

Please send corrections to *sanskrit@cheerful.com*